तः समित्पाणिरुदङ्मुखस्तिष्ठन् वैश्वानराप्रयति वेरयासउतिद्रूदशर्चेन सूक्तेन अग्निमुपस्थाय॰
यन्मया मनसेत्यनया समिधमग्नौ प्रक्षिप्य स्विष्टकृतं जुहुयात्। अथवा। अनुवाकत्रयेणाज्यहोमा
नंतरं सिंहे व्याघ्र इत्यादिभिश्चतसृभिस्तथाग्नेभ्यावर्त्तिन्निति चतसृभिरपि स्रुचाहुती हुत्वा पूर्वोक्त

प्र·
प्रकारेणाग्निमुपस्थायसमिधमग्नौप्रक्षिप्यपूर्ववत्स्विष्टकृतंहुत्वाजयादिहोमंकुर्यात्॥एतच्चकर्मपाप
तारतम्यानुसारेणपूर्वोक्तत्रिरात्रादिसंवत्सरांतपक्षाणांमध्येअन्यतमपक्षांतरग्रहणेनकर्तव्यं।यां
६३ वत्कर्मसमाप्तिपयोब्राह्मणस्यव्रतंयवागूराजन्यस्यव्रतंआमिक्षावैश्यस्यव्रतं।अथोसौम्येप्यध्वर
एतद्व्रतंब्रूयात्॥यदिमन्येतोपदस्यामीति·पयोव्रतादिभिःक्षीणोभवामिइति।तदाॐदनंधानाःसू
क्तुंनघृतमित्यनुव्रतयेदात्मनोनुपदासायेति।अथसिंहेव्याघ्रइत्यादयोमंत्राःप्रदर्श्यंते।सिंहेव्या
घ्रइतिचतसृणांसोमऋषिःत्विषिर्देवतात्रिष्टुप्छंदः।आज्यहोमेविनियोगः।सिंहेव्याघ्रउतया
पृदाकौ।त्विषिरग्नौब्राह्मणेसूर्येया।इंद्रंयादेवीसुभगाजजान·सानआगन्वर्चसासंविदाना
स्वाहा।त्विष्यैइदं॥१॥याराजन्येदुंदुभावायतायां॥अश्वस्यक्रंदेपुरुषस्यमायौ।इंद्रंयादेवी°

त्विष्येः० २॥ या हस्तिनिदुंदुभौ पनिया हिरण्ये। त्विषिरश्वेषु पुरुषेषु गोषु॥ इंद्रं या देवी० त्विष्ये० ३॥ रथे
अक्षेषु वृषभस्य वाजे। वाते पर्जन्ये वरुणस्य शुष्मे। इंद्रं या दे० त्विष्ये इदं० ४॥ अग्ने भ्यावर्तिन्नित्तिचत
सृणां अग्निर्ऋषिः। मंत्रोक्त देवताः यथाछंदांसि आज्य होमे वि० ॐ अग्नेभ्यावर्तिन्नभीत्यादि० प्रज
या धनेन स्वाहा॥ अग्नये अभ्यावर्तिने इदं० ५॥ अग्ने अंगिरः शतं ते इत्यादि० पुनर्नो रयिमा कृधि।
स्वाहा। अग्ने अंगिरसे॥ ६॥ पुनरूर्जा निवर्तस्व० विश्वतस्वाहा। अग्नये० ७॥ सह रय्या निवर्तस्वा० वि
श्वतस्परि स्वाहा। अग्नये० ८॥ अथ समिधमाधायोपस्थापनं कुर्वीत। वैश्वानरायेत्यस्य सूक्तस्य ह
दशर्चस्य ब्रह्मा स्वयंभूर्ऋषिः वैश्वानराद्या लिंगोक्त देवताः आद्ये त्रिष्टुभौ० तृतीयचतुर्थ्यावनुष्टुभौ०
ततस्तिस्रः त्रिष्टुभः अष्टमी पंक्तिः। ततो द्वे त्रिष्टुभौ० एकादशी द्वादशी च पंच पदे त्र्यक्षयौ॥ उपस्था

नोविनियोगः।ॐ वैश्वानरायप्रतिवेदयामि।यदीनृणंसंगरोदेवतासु।सएतान्पाशान्प्रमुंचन्प्रवेदसनो
ग· मुंचातुदुरितादवद्यात्॥१॥वैश्वानरःपवयान्नःपवित्रैर्यत्संगरमभिधावाम्याशां।अनाजानन्मनसा
६४ याचमानोयदत्रैनोअवतत्सुवामि॥२॥अमीयेसुभगोदिविविचृतौनामतारके।प्रेहामृतस्यय
छतामेतद्बद्धकमोचनं॥३॥विजिहीष्वलोकान्कृधिबंधान्मुंचासिबद्धकं।योनेरिवप्रच्युतोगर्भःसर्वान्प
थोअनुष्व॥४॥सप्रजानन्प्रतिगृभ्णातिविद्वान्प्रजापतिःप्रथमजाऋतस्य।अस्माभिर्दत्तंजरसः
परस्तादच्छिन्नंतंतुमनुसंचरेम॥५॥ततंतंतुमन्वेकेअनुसंचरंतियेषांदत्तंपित्र्यमायनवत्।अबं
ध्वेकेददतःप्रयच्छाद्दातुंचेच्छक्नुवांसःस्वर्गएषां॥६॥आरभेथामनुसंरभेथांसमानंपंथा
मवथोघृतेन॥यद्वांपूर्तंपरिविष्टंयदग्नौतस्मैगोत्रायेहजायापतीसंरभेथां॥७॥यदंतरिक्षंप

थिवी मुत द्यां यन्मातरं पितरं वाजहिंसिम ॥ अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमो नेषद् दुरिता यानि
चकृम ॥ ८ ॥ भूमिर्मातादितिर्नो जनित्रं भ्रातान्तरिक्षमभिशस्त्या नः ॥ द्यौर्नः पिता पितृयाच्छं भवा
सि जामिं मित्वा मा विवित्सि लोकात् ॥ ९ ॥ यत्र सुहार्दः सुकृतो मदंति विहाय रोगं तन्वः स्वायाः ॥ अश्लोणा अंगै
रहुताः स्वर्गे तत्र पश्येम पितरं च पुत्रं ॥ १० ॥ यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वा करिष्यन् ॥ यद्देवानां च
क्षुर्ध्यागो अस्ति यदेव किंच प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु ॥ ११ ॥ यदन्नमद्मि बहुधा विरूपं वासो हिरः
मुत गामजामयाविं ॥ यद्देवानां चक्षुर्ध्यागो अस्ति यदेव किंच प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु ॥ १२ ॥
एवमग्निमुपस्थाय ॥ यन्म इत्यस्य मंत्रस्य ब्रह्मा स्वयंभूर्ऋषिः ॥ अग्निर्देवता अनुष्टुप्छंदः ॥ समिधो मे वि०
यन्मया मनसा वाचा कृतमेनः कदाचन ॥ सर्वस्मात्तस्मान्मेळितो मोग्धि त्वं हि वेत्थ यथातथं स्वाहा ॥ अग्नय०

अथ स्विष्टकृद्धोमः। हव्यवाहमभिमातिषाहमिति पुरोनुवाक्यायाः स्विष्टमग्न इति याज्यायाश्च एतयोर्विश्वेदेवा ऋषयः अग्नि
स्विष्टकृद्देवता अनुष्टुप्विराट्छंदः। स्विष्टकृद्धोमे विनियोगः। ॐ हव्यवाहमभिमातिषाहं। रक्षोहणं पृतनासु
जिष्णुं। ज्योतिष्मंतं दीद्यतं पुरंधिं॥ अग्निं स्विष्टकृतमाहुवेम॥ ॐ स्विष्टमग्ने अभितत्पृणाहि विश्वान्देव पृत
ना अभिष्य॥ उरुं नः पंथां प्रदिशन्विभाहि ज्योतिष्मद्धेह्यजरंन आयुः स्वाहा॥ अग्नये स्विष्टकृत इत्युद्देशत्या
गः। अग्नये स्वाहा। रुद्राय तंतिच्चरायस्वाहेति समिधमिध्मसंनहनं चाग्नौ प्रहृत्य हुतशेषमग्नेः परितोऽश्व
त्थपत्रेषु निधाय कर्मसमृद्ध्यर्थं जयादिहोमं कुर्यात्। तत्र च योदशानां मंत्राणां यजुरूपाणां जयादीनां वि १५
श्वेदेवा ऋषयः प्रतिमंत्रं प्रथमपदोक्तगुणाविशिष्टा देवता आज्यहोमे विनियोगः। चित्तं च स्वाहेति पूर्ववः
ज्जुहुयात्। अथाष्टादशानामभ्यातानां विश्वेदेवा ऋषयः प्रतिमंत्रं प्रथमपदोक्तगुणाविशिष्टा देवताः आ

१ येहोमेवि० अग्निर्भूतानामितिजुहुयात्॥ अथराष्ट्रभृतः॥ अत्रआम्नायपाठेद्वादशमंत्राः॥ अर्थतस्तएवद्वा
विंशतिः एषांद्वाविंशतियजुषांविश्वेदेवाऋषयः॥ स्वस्वमंत्रोक्तगुणविशिष्टागंधर्वाप्सरसश्चदेवताः आम्ना
यपाठेसप्तमस्यद्वादशस्यचभुवनस्यपतिर्देवता आज्यहोमेवि०॥ ऋताषाडित्यादिजुहुयात्॥ जयाभ्या
ताराष्ट्रभृतइतिगणत्रयमंत्रोदुत्युच्यते॥ तदनंतरंवक्ष्यमाणाः प्रजापतयइत्यारभ्यआशिषउदंताः॥
पंचाप्युपहोमाउच्यंते॥ एतेपंचप्रायश्चित्तार्थामिति तत्रप्रजापतेनत्वदित्यादीनांमध्येप्रथमात्ययोर्वि
श्वेदेवाऋषयः मध्यस्थितानांव्यस्तानांतिसृणांव्याहृतीनांक्रमेणजमदग्निभरद्वाजभृगवाऋषयः॥ प्रजाप
तिरग्निर्वायुःसूर्योग्निःस्विष्टकृद्देवताः॥ प्रजापतइतित्रिष्टुप्आद्यव्याहृतिर्दैवीगायत्रीद्वयुष्णिग्होमे यदः
स्येतिद्वाविंशंयजुः आस्यहोमेवि०॥ प्रजापतेनत्वदेतत् १ भूः २ भुवः ३ स्वः ४॥ यदस्यकर्मणइति॥ इति

प्र· पंचहोमाः॥ यदस्येतिस्विष्टकृतंजुहुयात्। बर्हिरंजनपरिधिप्रहरणसंस्रावहोमंकुर्यात॥ संस्रावभागा
स्थेषाबृहंतः प्रस्तरेष्ठा बर्हिषदश्च देवा इमां वाचमभिविश्वे गृणंत आसद्यास्मिन्बर्हिषि मादयध्वं स्वाहा।
९६ वसुभ्यो रुद्रेभ्यः आदित्येभ्यः संस्रावभागेभ्य इदं· अथानाज्ञातादिप्रायश्चित्ताहुतीर्जुहुयात्॥ सर्व
प्रायश्चित्तार्थं भूर्भुवः स्वः स्वाहा। अथोत्तरपरिषेचनादिब्रह्मविसर्जनांतं कर्म कुर्यात॥ ॥इतिकूष्मांड
होमः॥ अथगणहोमः॥ सचापस्तंबमतानुसारेणाभिधीयते॥ आधानस्य वा काम्यानां कर्मणां वा आ
दौ पवित्रत्वकामनायै एतत्कर्म कर्तव्यं॥ साग्निकेषु कर्मसु सस्त्रीकः। इतरेष्वेकः स्वयंयजमानो दर्भासीनो द
र्भपाणिः प्राणानायम्यामुकप्रयोजनार्थं सप्ताहं सवनत्रयं गणहोमान् होष्यामीति संकल्प्य· स्वस्वगृह्या १
नुसारेणाग्निप्रतिष्ठापनादि सावित्रेचरुश्रपणांतं प्रणीतापात्रेण सह तंतुभिर्वेष्टितं कलशं प्रयुज्य प्रणीता

यत्संस्कृत्याग्नरतोनिधाय पूर्योग्निमुखांतेचरुमवदाय सावित्रींपुरोनूच्यसावित्र्यैवयाऽयया हुत्वापुनरुपस्ती
र्यद्विरवदायाभिघार्याग्नयेनयत्येकामाऽयाहुतिंहुत्वाततःसकृद्वघातिनाक्षतमभिघार्यतिस्विष्टकृदंतं
।तत्राग्नेनयेतिव्रत्यर्चेषड्र्चेनसूक्तेनसहस्रशीर्षेत्यष्टादशर्चेन·अग्निर्मन्वेतिद्वाविंशत्यर्चेनमृगारसूक्तेनः
यावामिंद्रावरुणेनगणेनचतुर्मंत्रेणयोवामिंद्रावरुणेत्यनेनाष्टमंत्रेणचपवमानःसुवर्जनइतिअनेना
नुवाकेनसप्तदशर्चेन·यद्देवादेवहेळनमितिविंशत्यर्चेनाच्छिद्रपठितेनानुवाकेन·वैश्वानरोनऊत्येत्यष्टमं
त्रेणच।एवमष्टभिर्गणैःप्रतिमंत्रंचरुणाजुहोति॥ततःस्विष्टकृतंजुहोतिसकृदुपस्तरणंसकृद्वदानंद्वि
रभिघारणंच॥ततश्चावशिष्टंकर्मयथागृह्यंकुर्वते।अथमंत्रपाठानुक्रमेणगणहोमःप्रदर्श्यते।दर्व्या
मुपस्तीर्यद्विरवदायाभिघार्याअग्नेनयेतिसूक्तेनार्च्येश्चवक्ष्यमाणैःपुरुषसूक्तादिभिरभ्युत्तरंत्रांतंप्र

ग्र· निमंत्रं जुहुयात्·अभिघार्य चरुशिष्टं हविः प्रत्यभिघारणं। पुनर्दर्भेषु बर्हिषि प्रत्यभिघारणं। अग्ने नये
६७ तिषड्चस्य पवित्रसूक्तस्य विश्वेदेवा ऋषयः अग्निर्देवता त्रिष्टुप् छंदः। चरुहोमे विनियोगः। मंत्रावृत्तसूक्तं।
ॐ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्॥ युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम
उक्तिं विधेम स्वाहा॥ अग्नये·१॥ प्र वः शुक्राय भानवे भरध्वं·हव्यं मतिं चाग्नये सुपूतं॥ यो दैव्यानि मानु
षा जनूंषि अंतर्विश्वानि विद्मना जिगाति॥ स्वा·अग्नये·२॥ अच्छा गिरो मतयो देवयंतीः। अग्निं यंति द्रवि
णं भिक्षमाणाः। सुसंदृशं सुप्रतीकं स्वंचं। हव्यवाहमरतिं मानुषाणां स्वाहा॥ अग्नये·३॥ अग्ने त्वमस्म
द्युयोध्यमीवाः अनग्नित्रा अभ्यमंत कृष्टीः। पुनरस्मभ्यं सुविताय देव क्षां विश्वेभिरजरेभिर्यजत्र स्वाहा १
अग्नये०४॥ अग्ने त्वं पारया नव्यो अस्मान्·त्वां यो: स्वाहा। अग्नये०५॥ प्रकारवामननाद्व्यमानादे

उदीचीनयथदेवयंत ॥ दक्षिणावायुग्निनीप्राच्येतद्दविर्भरंत्यग्नये घृताची स्वाहा· अग्नये· ६॥ इत्येकं सूक्तं
अथमेकोगणः ॥ सहस्रशीर्षेत्यष्टादशर्चस्यपुरुषसूक्तस्यप्रजापतिर्ऋषिः जगद्बीजः पुरुषोनारायणोवा
देवताः आद्याःपंचदशानुष्टुभः आद्यास्तिस्रःत्रिष्टुभः चरुहोमेविनियोगः ॥ सहस्रशीर्षापुरुषः ॥ स
हस्राक्षः सहस्रपात। सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलंस्वाहा। जगद्बीजायपुरुषायनारायणायवा
।येद्विपुरुषोदेवतात्वेनवक्ष्यतेतदापुरुषायेत्युद्देशत्यागः ॥ अथनारायणः। तदानारायणेति। एवमुत
रमंत्रेष्वपि। १॥ पुरुषएवेदं सर्वमित्यादि·२॥ त्यागःसएवसर्वत्र॥ एतावानस्य· ३ त्रिपादूर्ध्व·४। तस्मा
द्विराडजायत·५॥ यत्पुरुषेणहविषा·६॥ सप्तास्यासन्·७॥ तंयज्ञंबर्हिषि·८। तस्माद्यज्ञात्सर्वहुतःसंभृ
तं·९॥ तस्माद्यज्ञात्सर्वहुतःऋचःसामानि·१०। तस्मादश्वाअजायंत·११। यत्पुरुषंव्यदधुः·१२। ब्राह्म

णोस्य मुखं· १३॥ चंद्रमा मनसो· १४॥ नाभ्या आसीत· १५॥ वेदाहमेतं· १६॥ धाता पुरस्तात· १७॥ यज्ञेन य न·
ज्ञमयजंत· १८॥ नारायणाय॥ इति द्वितीयसूक्तं॥ अथ यमपरीगणः॥ अग्नेर्मन्व इति द्वाविंशर्चस्य मृगारसूक्त
६६ स्य विश्वेदेवा ऋषयः॥ लिंगोक्तदेवताः आदितः सप्त उपरिष्टाज्योतिषः॥ अष्टमी त्रिष्टुप् द्वा पंक्तिः॥ ततः पंच उप
रिष्टाज्योतिषः॥ चतुर्दशी यथा॥ पंचदशी षोडशी वानुष्टुभौ॥ सप्तदशी वानुष्टुभौ॥ गायत्री अष्टादशी त्रि
ष्टुप्॥ एकोनविंशी विंशी चोपरिष्टाज्योतिषौ॥ अंत्ये द्वे त्रिष्टुभौ॥ चरुहोमे विनियोगः॥ ॐ अग्नेर्मन्वे प्रथमस्येत्या
दि· स नो मुंचत्वंहसः स्वाहा॥ अग्नये· १॥ यस्येदं प्राणन्निमिषः स नो मुंचत्वंहसः स्वा· अग्नये· २॥ इंद्रस्य
मन्वे प्रथमस्य प्रचेतसो वृत्रघ्नस्तोमा उपमामुपागुः॥ यो दाशुषः सुकृतो हवमुपगंता स नो मुंचत्वंहसः॥ १
स्वाहा॥ अग्नये· ३॥ यः संग्रामं नयति संवशी युधे यः पुष्टानि संसृजति त्रयाणि॥ स्तौमींद्रं नाथितो जोहवीमि

सनोमुंचत्वंहसःस्वाहा। इंद्राय·४॥ मन्वेवांमित्रावरुणातस्यवित्तंसत्यौजसादृंहणायंनुदेथे।याराजानं
सरथंयाथउग्राता नोमुंचतमागसःस्वाहा·मित्रावरुणाभ्यां·५॥योवांरथऋजुरश्मिःसत्यधर्मामिथुश्चरंत
मुपयातिदूषयन्।स्तौमिमित्रावरुणानाथितोजोहवीमितौनोमुंचतमागसःस्वा·मित्रावरुणाभ्यां·६॥वायोः
सवितुर्विदथानिमन्महेयावात्मन्वद्बिभृतोयौचरक्षतः।यौविश्वस्यपरिभूबभूवतुस्तौनोमुंचतमागसःस्वा·
वायुसवितृभ्यां·७॥उपश्रेष्ठानआशिषोदेवयोर्धर्मेअस्थिरन्।स्तौमिवायुंसवितारंनाथितोजोहवीमितौ
नोमुंचतमागसःस्वाहा॥वायुसवितृभ्यां·८॥रथीतमौरथीनामह्वऊतयेशुभंगमिष्ठौसुयमेभिरश्वैः॥
ययोर्वांदेवौदेवेष्वनिशितमोजस्तौनोमुंचतमागसःस्वा·अश्विभ्यां·९॥यदयातंवहतुंसूर्यायास्त्रिचक्रे
णसंसदमिच्छमानौ।स्तौमिदेवावश्विनौनाथितोजोहवीमितौनोमुंचतमागसःस्वाहा।अश्विभ्यां·१०॥म

रुतां मन्वे अधि नो ब्रुवंतु प्रेमां वाचं विश्वामवंतु विश्वे। आशून्हुवे सुयमानूतये ते नो मुंचंत्वेनसः स्वाहा॥ मरुद्भ्यः २१
तिग्ममायुधं वीडितं सहस्वद्दिव्यं शर्धः पृतनासु जिष्णु। स्तौमि देवान्मरुतो नाथितो जोहवीमि ते नो मुंचंत्वेनस
ः स्वाहा॥ मरुद्भ्यः २२॥ देवानां मन्वे अधि नो ब्रुवंतु प्रेमां वाचं विश्वामवंतु विश्वे॥ आशून्हुवे सुयमानूतये ते नो मु
ंचंत्वेनसः॥ स्वाहा· विश्वेभ्यो देवेभ्यः २३॥ यदिदं माभिशोचति पौरुषेयेण दैव्येन॥ स्तौमि विश्वान्देवान्नाथि
तो जोहवीमि ते नो मुंचंत्वेनसः स्वा· विश्वेभ्यो देवेभ्य· २४॥ अनु नोद्यानुमतिर्यज्ञं देवेषु मन्यतां। अग्निश्च हव्य
वाहनो भवतां दाशुषे मयः। स्वा· अनुमत्यै हव्यवाहनाय अग्नये च· २५॥ अन्विदनुमते त्वं मन्यासै शं च नस्कृधि
॥ क्रत्वे दक्षाय नो हिनु प्रण आयूंषि तारिषत्स्वाहा॥ अनुमत्यै· २६॥ वैश्वानरो न ऊत्या प्रयातु परावतः॥ अग्नि २
रुक्थेन वाहसा स्वाहा। वैश्वानरायाग्नये· २७॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश॥

वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तं स्वाहा। वैश्वानरायाग्नये ॥१८॥ ये अप्रथेताममिते
भिरोजोभिर्ये प्रतिष्ठे अभवतां वसूनां ॥ स्तोमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुंचतमंहसः स्वाहा॥
द्यावापृथिवीभ्यां ॥१९॥ उर्वी रोदसी वरिवः कृणोतं क्षेत्रस्य पत्नी अधि नो ब्रूयातं ॥ स्तोमि द्यावापृथिवी नाथि
तो जोहवीमि ते नो मुंचतमंहसः स्वाहा॥ द्यावापृथिवीभ्यां ॥२०॥ यत्ते वयं पुरुष त्रा यविष्ठाविद्वांसश्चकृमा क
च्चनागः। कृधी स्वस्मां अदितेरनागा व्येनांसि शिश्रथो विष्वगग्ने॥ स्वाहा। अग्नये ॥२१॥ यथा ह त्यद्वसवो गौ
र्यं चित्पदि षिताममुंचता यजत्राः॥ एवा त्वमस्मन्मुंचा व्यंहः प्रातार्यग्ने प्रतरं न आयुः स्वाहा। अग्नये ॥२२॥
इति रतायं सूक्तं। अथ चतुर्थी योगणः॥ यावामिंद्रावरुणेत्येषां चतुर्णां यजुर्मंत्राणां क्थे देवा ऋषयः। इंद्रावरुणौ
देवता च रुद्रो मंविनियोगः। ॐ यावामिंद्रावरुणा यतव्या तनूः स्तेयमममंहसो मुंचतं स्वाहा। १॥ यावामिंद्रावरु

प्र॰ णासद्दस्यातनूःस्तये मम॑इद सोमंचतं। स्वा॰॥२॥ यावामिंद्रावरुणारक्षस्यातनूस्तये॰ ३॥ यावामिंद्रावरुणाते
जस्यातनूस्तये॰ ४॥ इंद्रावरुणाभ्यामिदं सर्वत्र॰॥ अयंचतुर्थोगणः॥ ॥योवामिंद्रावरुणाग्निवत्यस्थानांयजुर्मं
२० त्राणांविश्वेदेवाऋषय॰ इंद्रावरुणौदेवता। चरुहोमेविनियोगः। योवामिंद्रावरुणावग्नौस्त्रामस्तंवामेतेना
वयजे॥ स्वाहा। इंद्रावरुणाभ्यां॰ इतिसर्वत्र॰ १॥ योवामिंद्रावरुणाद्विपात्सुपशुषुस्त्रामस्तंवामेतेनावयजेस्वा॰
॥२॥ योवामिंद्रावरुणाचतुष्पात्सुस्त्रामः ३॥ योवामिंद्रावरुणागोष्ठेस्त्रामस्तं॰ ४॥ योवामिंद्रावरुणागृहे
षुस्त्रामः ५॥ योवामिंद्रावरुणाप्सुस्त्रामः ६॥ योवामिंद्रावरुणौषधीषुस्त्रामः ७॥ योवामिंद्रावरुणावनः
स्पतिषुस्त्रामस्तंवा॰॥८॥ अयंपंचमोगणः॥ ॥पवमानःसुवर्जनइतिसप्तदशर्चस्यानुवाकस्यसोमऋषि १
र्लिंगोक्तदेवताःपवमान्योवादे॰ आद्येद्वेगायत्र्यौ॰ तृतीयानुष्टुप्॰ चतुर्थपंचम्यौगायत्र्यौ॰ ततोद्वेत्रिष्टुभौ॰

अष्टमीगायत्रीततोद्वावानुष्टुभः।सप्तदशान्त्रिष्टुप्त्वरुद्रोमेविनियोगः॥ॐपवमानःसुवर्जनः।पवित्रेणवि
चर्षणिः।यःपोतासपुनातुमास्वाहा·पवमानायेदं·१॥पुनंतुमादेवजनाःपुनंतुमनवोधिया।पुनंतुविश्व आय
वःस्वाहा·देवजनेभ्योमनुष्येभ्योविश्वेभ्यःआयुभ्यः॥२॥जातवेदःपवित्रवत।पवित्रेणपुनाहिमा।शुक्रे
णदेवदीद्यत॥अग्नेक्रत्वाक्रतूँ२रनु।स्वाहा·जातवेदसेग्नये·॥३॥यत्तेपवित्रमर्चिषि।अग्नेविततमंतरा।ब्र
ह्मतेनपुनीमहेस्वाहा॥अग्नये·४॥उभाभ्यांदेवसवितःपवित्रेणसवेनच।इंद्रंब्रह्मपुनीमहे।स्वा·सवित्रे·॥
५॥वैश्वदेवीपुनतीदेव्यागात्।यस्यैबह्वीस्तनुवोवीतपृष्ठाः।तयामदंतःसधमाद्येषु।वयंस्यामपतयोर
यीणांस्वाहा।वैश्वदेव्यै·६॥वैश्वानरोरश्मिभिर्मापुनातु।वातःप्राणेनेषिरोमयोभूः।द्यावापृथिवीपय
सापयोभिः।ऋतावरीयज्ञियेमापुनीतांस्वाहा।वैश्वानरायवातायेषिरायमयोभुवेद्यावापृथिवीभ्यां·७

त्र· रुद्रैः सवितरुत्तभिः। वर्षिष्ठैर्देव मन्मभिः। अग्ने दक्षैः पुनाहि मा स्वाहा· सवित्रेग्नये ·८। येन देवा अपुनत ये
१ नापो दिव्यंकशः। तेन दिव्येन ब्रह्मणा। इदं ब्रह्म पुनीमहे स्वाहा। दिव्याय ब्रह्मणे ·९।। यः पावमानीरध्येति। ऋषि
भिः संभृतं रसं। सर्वं स पूतमश्नाति। स्वदितं मातरिश्वना स्वाहा ·पावमानीभ्यः १०।। पावमानीर्यो अध्येति। ऋ
षिभिः संभृतं रसं। तस्मै सरस्वती दुहे। क्षीरं सर्पिर्मधूदकं। स्वाहा·पावमानीभ्यः ११। पावमानीः स्वस्त्ययनीः।
सुदुघा हि पयस्वतीः। ऋषिभिः संभृतो रसः। ब्राह्मणेष्वमृतं हितं स्वा·पावमानीभ्यः १२।। पावमानीर्दिशन्तु नः
इमं लोकमथो अमुं। कामान् समर्धयन्तु नः। देवीर्देवैः समाभृताः स्वा·पावमानीभ्यः १३।। पावमानीः स्वस्त्ययनीः
सुदुघा हि घृतश्चुतः। ऋषिभिः संभृतो रसः। ब्राह्मणेष्वमृतं हितं स्वा·पावमानी·१४।। येन देवाः पवित्रेण। आ
त्मानं · हा·पावमानी·१५।। प्राजापत्यं पवित्रं· नीमहे स्वाहा। पावमानीभ्यः १६।। इन्द्रः सुनीती सह मा पुना

तु॰ मूर्द्धं यं त्वा पुनातु स्वाहा। सनीत्या सहितायैन्द्राय॰ स्वरूस्यः सहिताय सोमाय॰ समीच्या सहिताय वरुणाय॥
प्रयुणाभिः सहिताय धर्माय राज्ञे॥ मूर्द्धं यं त्वा सहिताय जातवेदसे च उद्दंनमम॥१७॥ अथ यंत्र सोगणः॥ यद्देवा
देवहेडनमिति अच्छिद्रपाठितस्याखंडार्त्यर्चस्यानुवाकस्य विश्वदेवाऋषयः लिंगोक्तदेवताः। आद्यानुष्टुप॰ द्वि
तीया षडवसाना जगती महापंक्त्या ख्याता तीया॰ अनुष्टुप चतुर्थी॰ त्रिष्टुप पंचमी सप्तपदा। अतिशक्करा षष्ठी।
त्रिष्टुप सप्तमी षडवसाना अतिजगती॰ अष्टमी षट्पदा जगती वा। नवमी बृहती। ततो द्विपदा शक्कर्यो द्वादशी
त्रिष्टुप। त्रयोदशी सप्तपदा अष्टिः। चतुर्दश्यनुष्टुप॰ पंचदश्यनुष्टुप विराट्। षोडशी गायत्री। ततस्तिस्रः त्रि
ष्टुभः। विंशत्यनुष्टुप॰ चरुहोमे विनियोगः॥ ॐ यद्देवा देवहेडनं देवासश्चकृमा वयं। आदित्यास्तस्मान्मा मुंच
तर्त्तस्यर्त्तेन मामुत स्वाहा। आदित्येभ्यः १॥ देवा जीवनकाम्या यद्वाचानृतमूदिम। अग्निर्मा तस्मादेनसः। गार्हप

प्र· त्यः प्रमुंचतु दुरिता यानि चकृम करोतु मामनेदसं स्वाहा अग्नये गार्हपत्याय ।२। एतेन द्यावापृथिवी कृतेन
त्वं सरस्वती। कृतान्मामुंचतां दूसः। यदन्यकृतमानिम स्वाहा॥ द्यावापृथिवीभ्यां सरस्वत्यै च ।३। सजातशं
१२ सादुत वा जामि शूंसां ज्यायसः शूंसादुत वा कनीयसः। अनाज्ञातं देवकृतं यदेनः। तस्मात्व मस्मान्जातवेदो मुमु
ग्धि। स्वाहा जातवेदसे ।४। यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामष्ठीवद्भ्यां शिश्नैर्यदनृतं चकृमा वयं अग्निर्मा
तस्मादेनसः गार्हपत्यः प्रमुंचतु दुरितायानि चकृम करोतु मामनेदसं स्वा। अग्नये गार्हपत्याय ।५। यद्धस्ताभ्यां
चकर किल्बिषाणि। अक्षाणां वग्नुमुपजिघ्रमाणः। दूरेपश्या च राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणानि स्वा
राष्ट्रभृत अप्सरोभ्यश्च ।६। अदीव्यन्नृणं यदहं चकार यद्वादास्यन्संजगारा जनेभ्यः। अग्निर्मा तस्मादेनसः उत्या
दि पूर्ववत् ।७। यन्मयि माता गर्भे सति। एनश्चकार यत्पिता। अग्निर्मा तस्मादुत्यादि ८। यदापिपेष मातरं

पितरं पुत्रः प्रमुदितो धयन्। अहिंसितो पितरौ मया तत्॥ तदेतन्न दग्ने अनृणो भवामि स्वाहा। अग्नये॥९।
यदंतरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जहिंसिम। अग्निर्मा तस्मा०।१०॥ यदाशसा निशसा यत्पराशसा
यदेनश्चकृमा नूतनं यत्पुराणं। अग्निर्मा तस्मा० ११॥ अतिक्रामामि दुरितं यदेनः। जहामि रिप्रं परमे सधस्थे
यत्र यंति सुकृतो नापि दुष्कृतः। तमारोहामि सुकृतां नु लोकं स्वाहा० अग्नये० १२॥ त्रिते देवा अमृजतैतदेनः। त्रि
त एतन्मनुष्येषु मामृजे। ततो मा यदि किंचिदानशे। अग्निर्मा तस्मा०।१३॥ दिवि जाता अप्सु जाता या जा
ता ओषधीभ्यः। अथो या अग्निजा आपः। ता नः शुंधंतु शुंधनीः स्वाहा० अग्ने॥१४॥ यदापो नक्तं दुरितं च
राम। यद्वा दिवा नूतनं यत्पुराणं। हिरण्यवर्णास्तत उत्पुनीत नः स्वाहा। अग्नये॥१५॥ इमं मे वरुण० वरुणा
य०१६॥ तत्त्वा यामि० वरुणाय०१७॥ त्वं नो अग्ने० अग्निवरुणाभ्यां० १८॥ स त्वं नो अग्ने० अग्निवरुणाभ्यां०
।१९।

त्वमग्नेअयास्यया।अग्नयेअयसे·२०॥ ॥अयंसप्तमोगणः।वैश्वानरोनऊत्येष्टनामऋज्नत्राणांविश्वेदेवा
ऋषयः।वैश्वानरोदे·आद्येद्वेगायत्र्यौ।३जगती।ततस्तिस्रःत्रिष्टुभः।सप्तमीजगती·८त्रिष्टुप्।चरुहोम
विनियोगः।ॐवैश्वानरोनऊत्याप्रयातुपरावतः।अग्निरुक्थेनवाहसा।अग्नयेवैश्वानराय·१॥ऋतावा
नंवैश्वानरमृतस्यज्योतिषस्पतिं।अजस्रंघर्ममीमहेस्वाहा।अग्नयेवैश्वानरायसर्वत्रत्यागः२॥वैश्वा
नरस्यदंसनाभ्योबृहदरिणादेकःस्वपस्ययाकविः।उभापितरामहयन्नजायताग्निर्द्यावापृथिवीभूरिरेत
सास्वाहा।३।पृष्टोदिविपृष्टोअग्निःपृथिव्यांपृष्टोविश्वाओषधीराविवेश।वैश्वानरःसहसापृष्टोअग्निः
सनोदिवासरिषःपातुनक्तंस्वा·४॥जातोयदग्नेभुवनाव्यख्यःपशुंनगोपाइर्यःपरिज्मा।वैश्वानरब्रह्मणेवि
न्दगातुंयूयंपातस्वस्तिभिःसदानःस्वा·५॥त्वमग्नेशोचिषाशोशुचानआरोदसीअपृणाजायमानः।त्वंदेवां

अभिप्रास्तेर मंचो वैश्वानर जातवेदो महित्वा॰ वैश्वानरायाग्नये जातवेदसे॰ ६॥ अस्माकमग्ने मघवत्सु धा
रयानामिक्षत्रमजरं सुवीर्यं। वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः स्वा॰ ७॥ वैश्वानर
स्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः। यतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण स्वा॰ ८॥ अ
ष्टमो गणः॥ ॥ इत्यष्टभिर्गणैः प्रतिमंत्रं स्रुवेणाज्यं चरुणा हुत्वा जयादिहोमान् जुहुयात्। जयादिमंत्राः।
कूष्मांडहोमे प्रदर्शिताः। अथ दर्व्यां सकृदुपस्तीर्य सकृदवदाय द्विरभिघार्य अग्नये स्विष्टकृते स्वाहेति स्विष्ट
कृतं। बौधायनमते तु। हव्यवाहमिति पुरोनुवाक्यामनूच्य स्विष्टमग्न इति याज्यया जुहुयात्॥ समितंनहने
न्तो प्रहृत्य॰ गणहोम प्रायश्चित्त परिधयः शम्याः। बर्हिरंजनसंस्रावहोम पूर्णपात्रा हृासन ब्रह्मविसर्ज
नांतं कर्म निर्वर्त्य॰ पूर्वासंगृहीतं कलशमादाय नैर्ऋतदिग्गतां गत्वा चतुष्पथे उपलिप्यापविश्य पादौ प्रक्षाल्या

प्र· चम्यप्राङ्मुखः सन् कलशं पुरो निधाय· तत्र पत्नीभिः सह कर्तव्ये ताभिः सह। अथ कस्यैककर्तव्यं चेदासने
स्वयमेव यजमानः कलशे आत्मनो रूपमवेक्षमाणः वित्तं संतं कं मंत्रं समुदायात्मेकं सिंहे मे मन्युरित्यनुवाकं वा
४ धायनाचार्यप्रणीतकल्पसूत्रस्थं पठेत्॥ अस्यानुवाकस्य सौत्रत्वादेव ऋष्यादयो न प्रदर्शिताः। ॐ सिंहे मे मन्यु
र्व्याघ्रे मेऽन्तरामयो वृके मे क्षुत् श्वे मे पिपासा धन्वनि मे पिपासा राजगृहे मे ज्ञानं यो नु मा निमेनं द्वीगर्दभे मे ह्रीरः श
र्यके मे न्द्रीरश्वतर्यां मे वेपथुः कूर्मे मे द्रुग रा वस्तमे पसर्या अप्रिये मे मत्युभ्रातृव्ये मे पाप्मा सपत्ने मा निर्ऋति
र्दुष्कीर्तौ मे वृधिः परश्वधिमे समरुद्दुः खट्के म आर्तिर्गर्दभे म आंध्यं गौरे मे बाधिर्यं मरुहे मे शोको गोधायां
मे स्वेदो जरायां मे हिमं हस्मन्नाकुनौ मे भीरुतां शुके मे पापगंध उलूके मे खलाभ्यासः कोके मद्ध्यां मर्कटे मे
दुर्बुद्धिः कुलले मे मंस्यो लूले मे प्रथ्याड्स्से मे तस्मात्स्वपे मे भ्रमर्द्व्यामि आद्यं कोशे मे गंधः कुमार्यां मे लंक

रः सूकरे मे कं दस्युः शूद्रा कुनि मे स्वप्नो जगरे मे दुःस्वप्नो विघृति मे स्म यो लोपायां मे क्लेदः गर्भे मे पापलक्ष्मीः स्त्री
षु मेः नृत मज्जासु मे कर्कशो ग्रात्ये मेऽन्यायः शूद्रे मे स्तेयं वैश्ये मे कुमर्म हतं राजन्यबन्धाने मे ज्ञानं नैषादे भ्रूणहः
त्या कुलिंगे मे श्वयथु कुलूके मे विलासस्तु द्रामाणि मे वामितिः। किंपुरुषे मे रोदो द्रूापानि मे निष्टं हस्तानि मे किलासः शु
नि मे दुरिष्टं स्तावन्येष मे ब स्रे विदेहेषु मे ऽपथो महावर्षेषु मे ग्लौः पृथ वत्स मे तक्मा दंदुभौ मे कागरिकाड्न्तौ स्वा
कुषु मे पित्तं कलिंगेषु मे मे ध्य मश्चलयां मेः अनस्तापं श्वल्यां मे दुः श्वारिन्न मारखुनि मे दंतरोगो माक्षिकायां मे
उल्करा: शुके मे हरिमा पूरे मे कंजल्पा वृषमे जरा वाशे मे पापवाद अपस्मम श्च मोत्र स्लग्ने मे किल्बिषमपादि
पाप्मन पुनरपनाशिता भयान्। पाप्मनो धेहि मकृतस्य लोके पाप्मने त्वा विहतो यानः पाप्मानं जहाति ते मु
स्वात्वा जहिमो यय मन्य त्रास्मिन्नि वसतां सहस्राक्षो मर्त्यो यानो द्विष्मा रिष्यतु यमुद्दिश्यत मुजहात्याभि

प्र· मंत्रयस्यामस्यादिशि दूर्वाभवति तां दिशं मेता अप उपसिंचेत्। पुष्पवतो दुर्भिक्षास्तस्मै भूयासुर्योस्मान्द्वेष्टि यं च
वयंद्विष्मः इति॥ अथाप उपस्पृश्य पात्रमनवेक्ष्यमाणो यथादेशं देवयजनं प्रविशेत्। ततः स्नायीत एवं सप्ताहं
५ त्रिषु सवनेषु कृत्वा अंते आशीर्वचनं कारयित्वा पायसेन सर्पिष्मता यथाशक्ति ब्राह्मणान्भोजयित्वा तेभ्यो गां
भूर्तिं हिरण्यानि दत्वा ब्राह्मणे गां मूल्यं वा दद्यात्॥ यावद्व्रतं सवनत्रयं॥ मौनी सकृद्धविष्याशी नियतेंद्रियश्च
भवेत्। एवं कुर्वन्सर्वेभ्यः पापेभ्यः प्रमुच्यते पुण्यवांश्च भवति॥ ॥इति विश्वनाथविरचितायां विश्वप्रका
शिकायां गणहोमः॥ अथ प्रसंगात् कृच्छ्रादिलक्षणं उच्यते॥ तत्र पादकृच्छ्रमाह। एकभक्तेन नक्तेन तथै
वायाचितेन च॥ उपवासेन चैवायं पादकृच्छ्रः प्रकीर्तितः। एकभक्तेन दिवैवोक्तकालकृतसकृद्भोजनेन· अया
चितेन· परकीयान्नस्य च वाग्याचनं न कुर्यात्। अथापरः। अन्नं न कंचन याचतेति· न रात्रौ न दिवा भोजनं·

उपवासः तेनच॰ एवंचतुरहः साध्यः पादकृच्छ्रः। एकभक्तादौग्रासंसंख्या। नियमः पराशरेणोक्तः। सायंतुद्वात्
रिंशद्ग्रासाः प्रातःपंचदशस्मृताः। चतुर्विंशतिरयाच्याः परेनिरशनंस्मृतं॥ सायंभक्ते॰ आपस्तंबस्तुप्रकारांतरे
णाह। सायंद्वाविंशतिग्रासः प्रातःषड्विंशतिस्मृताः। चतुर्विंशतिरयाच्याः परेनिरशनाःस्मृताः। कुक्कुटांडप्रमा
णास्युः यथाचास्यंविशेत्सुखमिति॥ अनयोःपक्षयोः शक्त्यपेक्षयाविकल्पः। एवमुत्तरत्रापिशक्त्यपेक्षोवि
कल्पोज्ञेयाः। आपस्तंबस्तुचतुर्धाप्राजापत्यकृच्छ्रंविभज्यवर्णानुक्रमेणपादकृच्छ्रमाह। त्र्यहंनिरश
नंपादःपादश्चायाचितंत्र्यहं। सायंत्र्यहंतथापादः पादःप्रातस्तथात्र्यहं। प्रातःपादंचरेच्छूद्रः सायंवैश्यस्य
दापयेत्॥ अयाचितंतुराजन्येत्रिरात्रंब्राह्मणेस्मृतः। प्रातःपादएकभक्तत्रयं। सायंपादोनक्तत्रयं। अया
चितंअयाचितत्रयं। त्रिरात्रमुपवासत्रयं॥ अयाचितपादउपवासपादश्चेतिपादद्वयंमिलित्वाअर्धकृच्छ्रः

प्र· नक्तपादरहितमवाप्तिस्यं पादत्रयं पादोनकृच्छ्रः। यदाद्दसएव· सायंप्रातर्विनार्धंस्यात्पादोनं नक्तवर्जितमिति
·अर्धकृच्छ्रस्य प्रकारांतरमाह स एव॥ सायंप्रातस्तथैकैकं दिनद्वयमयाचितं। दिनद्वयं च नाश्नीयात्कृच्छ्रार्धं
२,६ तद्विधीयते॥ ॥अथ प्राजापत्यकृच्छ्रः॥ याज्ञवल्क्यः। यथाकथंचित्त्रिगुणः प्राजापत्योयमुच्यते॥ यंस्त्वोक्तो
दिनचतुष्टयात्मकः पादकृच्छ्रः स एवायमित्यनेनानिर्दिश्यते। अयं पादकृच्छ्रो यथाकथंचित्त्रिगुणः प्राजाप
त्यो भवति। यथाकथंचिदित्यनेन चत्वारः पक्षा उपात्ताः। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन
चैवायमित्येतत्क्रमेणैकभक्तादीनामानुलोम्येन स्वस्थानविवृद्धिरित्येकः। प्रतिलोम्येन स्वस्थानविवृद्धिरि
ति द्वितीयः। दंडकलितवदावृत्तिरिति तृतीयः। सर्वत्र उपादिरहितपक्षश्चतुर्थः। तत्राद्यपक्षमाह मनुः। त्र्य
हं प्रातः त्र्यहं सायं त्र्यहमद्यादयाचितं॥ त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः। अत्रैकभक्तादीनां स्व

स्थानएवातिष्ठेत्तावत्स्वस्थानंनविशेत्॥ द्वितीयमाहवसिष्ठः। प्रातिलोम्यंचरेयुस्ताःकृच्छ्रचांद्रायणोत्तरं
उपवासत्र्यमयाचितत्र्यंनक्तत्र्यंएकभक्तत्र्यमितिप्रातिलोम्यं। तृतीयमपिसएवाह। अहःप्रातरहर्नक्तमह
रेकमयाचितं। अहःपराकंतत्रैकमेकंचतुरहौपरौ। पराकशब्दउपवासपरः। चतुर्थंपक्षमङ्गिराः। तस्मा
त्कृच्छ्रंसमासाद्यसदाधर्मपथेस्थितः। प्रायश्चित्तंप्रदातव्यंजपहोमविवर्जितं॥ जपाद्यनधिकारेअन्यदेवतीर्थ
यात्राप्रदक्षिणादि॥ अथातिकृच्छ्रः। मनुः। एकैकंग्रासमश्नीयात्त्र्यहाणित्रीणिपूर्ववत्। त्र्यहंचोपवासेदंत्य
मतिकृच्छ्रंचरन्द्विजः। त्रीणित्र्यहाणि। नवदिनानिपूर्ववत्। एकभक्तादिकालेतत्तन्नियमयुक्तःसन्नित्यर्थः। याज्ञ
वल्क्यः। त्र्यहमेवातिकृच्छ्रःस्यात्पाणिपूरान्नभोजनः। अयमेवपूर्वोक्तप्राजापत्यधर्मकएव। अयंतुविशेषः। एक
भक्तनक्तायाचितदिनेषुपाणिपूरणमात्रंप्रसृतिमात्रं। नतुपूर्वोक्तद्वाविंशत्यादिग्रासानि। अत्रचपाणिपूर

ग्र· णांनमात्रमेवविधेयं। नतुभोजनं। उपवासदिनेषुपाणिपूरणंचनास्ति। अतिकृच्छ्रपादादिष्वप्येवंप्राजापत्य
वदेव॥ अथकृच्छ्रातिकृच्छ्रः। गौतमः। अप्भक्षस्तृतीयःसकृच्छ्रातिकृच्छ्रः। इतिद्वादशरात्रमुदकेनैववर्तनंना
१७ न्नेन। यमः। एकैकंपिंडमश्नीयात्कृच्छ्रपिंडंत्र्यहंनिशि। अयाचितंत्र्यहंपिंडंवायुभक्षस्त्र्यहंपरं। अतिकृच्छ्रंचरे
देतत्पवित्रंपापनाशनं। चतुर्विंशतिरात्रंतुनियमात्मानजितेंद्रियः। कृच्छ्रातिकृच्छ्रंकुर्वीतएककालान्नाद्विजोत्तमेति॥
कल्पेप्रातरेकभक्तकालइतियावत्। एककालानवचनाच्चतुर्विंशतिरात्रसाध्यमतिकृच्छ्रद्वयंकृच्छ्रातिकृच्छ्राख्यः
कृच्छ्रोभवतीत्यर्थः। याज्ञवल्क्यः। कृच्छ्रातिकृच्छ्रःपयसादिवसानेकविंशतिं। यमेनचतुर्विंशतिरात्रसाध्यकृ १
च्छ्रातिकृच्छ्रभोजनादिनेष्वेकैकग्रासविधानाद्दुग्धभोजनेपिपत्रपुटकादिग्रासपरिमाणंकृत्वाएकग्रासपर्याप्तं
दुग्धमश्नीयात्। एकैकंवर्तुमशक्तःश्चेत्कृच्छ्रप्रतिकृतिभूतप्राजापत्योक्तरीत्याद्वाविंशत्यादिग्राससंख्ययाताव

दुग्धं पातव्यं। अथवा यावता प्राणधारो भवति। तावद्ग्राह्यं। अनुक्तद्रव्यपरिमाणेषु सर्वत्रैवं ग्राह्यं प्राणया
त्रामेवेति। गौतमाद्युक्तपक्षेषु शक्त्यपेक्षया विकल्पः। एवमुत्तरत्रापि द्रष्टव्यं। अथ पराकः। याज्ञवल्क्यः। द्वाद
शाहोपवासेन पराकः परिकीर्त्तितः। अथ सौम्यकृच्छ्रः। पिण्याकं सक्तवस्तक्रं चतुर्थे दिन्य भोजनं॥ वासो वै द
क्षिणां दद्यात्सौम्योयं कृच्छ्र उच्यते। पिण्याकः पीडिततिलकल्कः। आचामः ओदनावस्राव। पिण्याकं प्राणया
त्राप युक्तं ग्राह्यं। नाधिकं। याज्ञवल्क्यः। पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरं। एकरात्रोपवासश्च कृच्छ्रः सौ
म्यायमुच्यते। एतच्च षड्दिनसाध्यं। अथ तुलापुरुषाख्यकृच्छ्रः। याज्ञवल्क्यः। एषां त्रिरात्रमभ्यासादेकैकस्य
यथाक्रमं। तुलापुरुष इत्येष ज्ञेयः पंचदशाह्निकः। एषां पिण्याकाचामतक्राम्बुसक्तूनां प्रपंचानां प्रत्येकं क्रमेण
त्रिरात्रमभ्यासात्पंचदशाह्निकस्तुलापुरुषसंज्ञकः कृच्छ्रो भवति। यमस्त्वेकविंशतिरात्रसाध्यं तुलापुरुषमा
ह।

प्र· आचाममथपिण्याकंतक्रंचोदकसक्तवः। त्र्यहंत्र्यहंप्रयुंजानोवायुभक्षस्त्र्यहंत्र्यहं। त्रिनयनोप्येवमाह। अ
याज्ययाजनंकृत्वाप्राश्यमूत्रपुरीषकं। अप्रतिग्राह्यमादाययाजयित्वावनिंदितान्। विनायकापसृष्टस्यमहाव्या
८ धिहतस्यच। एतत्कृछ्रंतुकापूर्वंमहापातकनाशनं॥ स्वर्गद्वारमिदंपुण्यंमहादेवेननिर्मितं। आचमनादी
नांप्रत्येकंफलमाह। वाकूपाद्दश्चेलरजोभिर्हतानिविहतानिच॥ आचामस्तानिनिर्हंतिनवश्राद्धंचसूतकं। तै
लस्यदारुणंकिंचित्केशाकीटहतंचयत्॥ प्राश्यमूत्रंपुरीषंचश्वस्लदस्पृष्टमेवच। पिण्याकस्तानिनिर्हंतिअ
स्थिभित्वातुपास्खलं॥ आचामेषुचयेदोषाःस्नेहदोषाश्चयेक्वचित्॥ खरोष्ट्रमनुष्यसंस्पृष्टमघसंस्पृष्टमेव
च॥ तक्रेणतानिनिर्हंतियज्ञाघातश्चवल्मीकितं॥ कनकंचतिलागावोभूमिराच्छादनंस्त्रियः॥ सर्वंपुनातिध
र्मात्मागृहंसोदकसक्तुभिः॥ ब्रह्महत्यांभ्रूणहत्यांसुवर्णस्तेयंसुरापानंगुरुदाराभिगमनंकन्यादूषणं।

बाभिगमनंवायुभक्षापुनातितत्। इत्येकविंशतिरात्रसाध्यतुलापुरुषकृच्छ्रः॥ इदंकृच्छ्रंकृत्वातुलापुरुषदा
नंकुर्यात्।ग्रंथाभिविस्तरभयान्नलिखितं।आवश्यकंचेत्ग्रंथांतरेद्रष्टव्यं। ॥अथसांतपनकृच्छ्रं॥ या
ज्ञवल्क्यः॥गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकमितिउद्दिष्टंपंचगव्यंतत्पवित्रंकायशोधनमिति।ग्रंथांत
रे॥कुशोदकंतुगोक्षीरंदधिमूत्रंशकृत्घृतं॥प्राश्यापरेद्युरुपवसेत्कृच्छ्रंसांतपनंचरेत्॥गोमूत्रादीनिषड्व्य
कीकृत्यपीत्वाआहारांतररहितःसन्तिष्ठन् परेद्युरुपवसेदितिद्विदिनद्वयसाध्यःकृच्छ्रः। केचित्पृथक्पृथक्
षट्सुदिनेषुप्राशनंवदंति।गोमूत्रंधूम्रवर्णायाश्वेतायाश्चापिगोमयं॥पयकांचनवर्णायाःनीलायाश्च
तथादधि॥घृतंचरक्तवर्णायाःसर्वंकापिलमेवच॥अलाभेसर्ववर्णानांपंचगव्येष्वयंविधिः।गोमूत्रे
माषकास्तस्रोगोमयस्यतुषोडश॥क्षीरस्यद्वादशप्रोक्तादध्नस्तुदशकीर्तिताः॥ गोमूत्रवत्घृतस्य

शस्तदर्धं तु कुशोदकं। गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं। आप्यायस्वेति गोक्षीरं दधिक्राव्णेति गोदधिः॥
तेजोसि शुक्रमित्याज्यं देवस्यत्वा कुशोदकं॥ पंचगव्यं घृतापूर्वं होमयेदग्निसंनिधौ॥ सप्तपत्रास्तु ये दर्भा अच्छिन्ना
ग्राः शुकत्विषः। एतैरुधृत्य होतव्यं पंचगव्यं यथाविधि। इरावती इदंविष्णुर्मानस्तोके च शंवर। एताभिश्चैव होतव्यं
हुतशेषं पिबेद्द्विजः। प्रणवेन समालोड्य प्रणवेनाभिमंत्र्य च। प्रणवेन समुधृत्य पिबेत्प्रणवेन तु। मध्यमेन पला
शस्य पद्मपत्रेण वा पिबेत्। स्वर्णपात्रेण ताम्रेण ब्रह्मतीर्थेन वा पुनः। यत्वगस्थिगतं पापं देहे तिष्ठति मामके। नव
ब्रह्मकूर्चोपवासस्तु दहत्यग्निरिवेंधनं। ब्रह्मकूर्चोपवासस्त्वब्देन सांतपन उच्यते। देवताः संप्रवक्ष्यामि आ १०
नुपूर्व्येण यस्य याः। वरुणो देवता मूत्रे गोमये हव्यवाहनः। सोमः क्षीरे दधि वायु घृते रविरुदाहृतः। प्रति
मासं पौर्णमास्याममावास्यायां तथापि वा पिबेत्। ब्रह्महा परदाराश्च ये चान्ये स्थिता मलाः। ब्रह्मकूर्चो

ददेत्सर्वंयथाग्निस्तृणमेवतु॥ ॥इतिकृच्छ्रमस्तकृच्छ्रःविस्मृ।अथापरंब्रह्मकूर्चं।गोमूत्रभागस्तस्यार्धंशकृत्तः
स्यार्धंकंपयः।द्वैतंर्धंदधिनस्यार्धंघृतंचकुशवारिच।जाबालिः।गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं।एकै
कंत्र्यहंपीलात्वहोरात्रमभोजनं॥कृच्छ्रःसांतपनोनामसर्वपापप्रणाशनः।इति।इतिसमाह्रसाध्योविस्मृकू
र्चेकृच्छ्रः।अथयतिसांतपनं।शंखः।एतदेवत्र्यहाभ्यस्तंयतिसांतपनंस्मृतं।मिश्रितंपंचगव्यंत्र्यहंपिबेदित्य
र्थः॥अथमहासांतपनं॥पृथक्सांतपनद्रव्यैःषडहःसोपवासकः।सप्ताहेनतुकृच्छ्रोयंमहासांतपनःस्मृ
तः।यमस्तु।त्र्यहंपिबेत्तुगोमूत्रंत्र्यहंवैगोमयंपिबेत्।त्र्यहंदधित्र्यहंसर्पिःत्र्यहंक्षीरंततःशुचिः।महासांत
पनंह्येतत्सर्वपापप्रणाशनं॥एतत्पंचदशाहसाध्यं।जाबालिः।षण्णामेकैकमेतेषांत्रिरात्रमुपयोजयेत्।
त्र्यहंचोपवसेदंत्यंमहासांतपनंविदुरिति॥एकविंशतिरात्रसाध्येयं॥अथातिसांतपनं।यमः।एतान्येव

प· तथा येयान्येकैकं तु ब्रह्मद्रं ब्रह्म द्रं। अतिसांतपनं नाम श्वपाकमपि शोधयेदिति। एतच्च द्वादशाहसाध्यं। अथ पर्
णकृच्छ्रः। पर्णोदुंबरराजीवबिल्वपत्रकुशोदकैः। प्रत्येकं प्रत्यहाभ्यस्तैः पर्णकृच्छ्र उदाहृतः। पर्णं पलाशः। प
० र्णादिपत्राणां कुशानां चैकैकस्य क्वाथोदमेकैकस्मिन्दिने पिबेत्। एषः पंचदिनसाध्यः। जाबालिः। पलाशबि
ल्वपद्मानां पर्णान्यौदुंबराणि च। अश्वत्थस्य च पर्णानि अशेदेकैकशस्तथा। अहोरात्रोपवासश्च पर्णकृच्छ्रः
प्रकीर्तितः। अयं षडहसाध्यः। विष्णुः। कुशपलाशोदुंबरपद्मशंखपुष्पीवटब्रह्मसुवर्चलापत्रैः क्वथितस्यां
भसः प्रत्यहपानं पर्णकृच्छ्र इति। प्रत्यहमेकैकस्य क्वाथः। अयं तु सप्ताहसाध्यः। शंखलिखितौ। पद्मबिल्व
पलाशोदुंबरकुशोदकान्येकमभ्यानि तानि पर्णकृच्छ्रः। समस्तान्येतानि त्रिरात्रेण प्रयुक्तानि पर्णकूर्च इति।।
अत्रापि क्वाथ एव। अभ्यासे विशेषमाह यमः। एकैकं त्र्यहमश्नीयात्पर्णकृच्छ्रो विधीयत इति। एवं पंचदशाहः

साध्योयं। एवं समस्तान्येतानीत्यादि· पद्मादीनि पंच क्वाथ्यत्वात्त्रिरात्रोपोषितः सन्पिबेत। सपर्णकूर्चः॥
अथ फलादिकृच्छ्रः। फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः। शरीरयात्रामात्रोपयुक्तफलानि मासं भक्षये
त। तत्र सर्वव्रतसाधारणेतिकर्तव्यतापि कर्तव्या॥ तानि च फलानि कानीत्याकांक्षायामाह स एव। श्रीकृच्छ्रः श्री
फलैः प्रोक्तः पद्माक्षैरपरस्तथा। मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतं। पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्य
ते। मूलकृच्छ्रः स्मृतो मूलैः तोयकृच्छ्रो जलेन तु। पत्रैः श्रीवृक्षादिपत्रैः। तत्कृच्छ्रः पुष्पकृच्छ्रः। पुष्पाण्यपि श्रीवृ
क्षादीनामेव। मूलान्यपि तेषामेव॥ ॥अथ तप्तकृच्छ्रः॥ तप्तक्षीरघृतांबुनामेकैकं प्रत्यहं पिबेत। एकरात्रोप
वासश्च तप्तकृच्छ्र उदाहृतः। दिनचतुष्टयसाध्यः॥ अयमेव तप्तकृच्छ्रः। एभिरेव सोपवासैर्द्विरात्रसंपाद्यः सां
तपनवत्तप्तकृच्छ्र इत्युक्तः। मनुः। तप्तं कृच्छ्रं चरन्विप्रो दधिक्षीरघृतानिलान॥ प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नया

समाहितः। प्रतित्र्यहं जलादीन् प्रत्येकं त्र्यहं त्र्यहं पिबेदित्यर्थः। अयं चतुर्द्वादशरात्रसाध्यः। जलादिपरिमाणमाह
पराशरः। अपां पिबेत्तु त्रिपलं द्विपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पिः त्रिमात्रं चोष्णमारुतं। त्रिरस्यपूरणः
मुष्णमाद्रकवाष्पं पिबेदित्यर्थः। प्रकारांतरेणापि तप्तकृच्छ्रः। षट्पलं तु पिबेदंभः त्रिपलं तु पयः पिबेत्। पलमेकं
पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते॥ ॥अथ शीतकृच्छ्रः। विष्णुः। त्र्यहमुष्णाः पिबेदापः त्र्यहमुष्णं पयः पिबेत्।
त्र्यहमुष्णं घृतं पीत्वा नाश्नीयात्त्र्यहमेव तत्॥ तप्तकृच्छ्रः। एष एव शीतः शीतकृच्छ्रः। अयं दिनत्रयसाध्यः। प
राशरः। त्र्यहं शीतं पिबेत्तोयं त्र्यहं शीतं पयः पिबेत्। त्र्यहं शीतं घृतं पीत्वा वायुभक्षः त्र्यहं परं॥ द्वादश
दिनसाध्यः॥ ॥अथान्योपि कृच्छ्रः। गौतमः॥ बिसान्युदकसिद्धानि मासमश्नीत संयतः। सकृत्वा सोदकान्मा
संकृच्छ्रो वारुण उच्यते। बिल्वैरामलकैर्वापि पद्माक्षैरथवा शुभैः। मासेन लोके श्रीकृच्छ्रः कथ्यते द्वि

ऽसत्तमैः। गोपुरीषाद्यवान्नंचमासेनित्यंसमाहितः। व्रतंतुयावकंकुर्यात्सर्वपापापनुत्तये॥ अनश्नंज्ञ
लमध्यस्थस्त्वरात्रंजपेद्बुधः। संवत्सरकृतंपापंजलस्थोव्यपोहति। अपोवारुणसूक्तानां। योगयाज्ञव
ल्क्यः। वायुभक्षोदिवातिष्ठेद्रात्रिंनीत्वाप्सुसूर्यदृक्॥ सहस्राष्टाधिकंजप्त्वागायत्रींजलसंस्थकः। द्वितीयदिने
सूर्यंदृष्ट्वाअष्टोत्तरसहस्रंगायत्रीजपंकृत्वापारणांकुर्यादित्यर्थः॥ ॥ अथार्धकृच्छ्रः। तथामासोपवासो
विज्ञेयोदिनात्रिंशदुपोषणात्॥ तथागोमूत्रकृच्छ्रः। आतस्तैःश्चारयित्वागांगोधूमान्यवमिश्रितान्। ता
न्गोमयोत्थान्संगृह्यपिबेद्गोमूत्रयावकमिति॥ ॥ अथचांद्रायणं। याज्ञवल्क्यः। तिथिवृद्ध्याचरेत्पिंडान्
शुक्लेकृष्णेप्रसंमितान्॥ एकैकंह्रासयेत्कृष्णेपिंडंचांद्रायणंचरन्॥ इंदुक्षयेनभुंजीतएषचांद्रायणोविधिः
ः। चरेद्ध्रासयेत्॥ चांद्रायणंग्राससवृद्धिभ्यांचंद्रस्यायनंचरणमिवचरणंयस्मिन्कर्मणि॥ तच्चांद्रायणं

·प्र· संज्ञायां दीर्घः। इदं यवमध्यचांद्रायणं। मध्येऽग्रासाधिक्येन स्थूलत्वात्। गौतमस्त्वन्यथाह॥ अतश्चांद्रा
यणं तस्योक्तो विधिः कृच्छ्र इति॥ कृच्छ्रे यदुक्तं तिष्ठेदहनीत्यादि तत्सर्वमत्र भवतीत्यर्थः। अत्र विशेषमाह। आ
९२ वपनं चरेत्। व्रतं प्रायश्चित्तं। तदर्थं यच्चांद्रायणं तदा वपनं भवति। अभ्युदयार्थिनो भवतीत्यर्थः॥ त
था। आप्यायस्व· सं ते पयांसि· नवो नव· इत्येताभिस्तर्पणं आज्यहोमो ऐंद्रावैषध्यानुमंत्रणं। उप
स्थानं चंद्रमसो यद्देवा देवहेडनमिति च तस्राभिराज्यं जुहुयात्। देवकृतस्येति चांते समिद्भिः। ॐ भूर्भुवस्व
स्तपः सत्यं यशः श्रीः ऊर्गिडौजस्तेजः पुरुषो धर्मः शिव इत्येतैर्ग्रासानुमंत्रणं प्रतिमंत्रं मनसा मनः॥
स्वाहेति सर्वानेतैरेव ग्रासान् भुंजीत॥ आप्यायस्वेत्यादिभिर्नवो नव इत्येताभिर्मंत्रैस्तर्पणं कृत्वा।
चंद्रमस उपस्थानं कृत्वा आज्यहोमं हविरनुमंत्रणं च कुर्यात्। चंद्रोपस्थाने मंत्रः। आप्यायस्वेत्यादयः

यद्देवादेवहेडनमिति चत्वार आद्यहोमे प्रतिमंत्रं च होमः। देवकृतस्यैनसोवयजनमसीत्यादिरेकैकशः
समिद्भिरिति बहुवचनात्कपिंजलन्यायेन यद्यपि त्रित्वमेव प्रतीयते तथापि यद्देवादेवहेडनमिति चत्वारः अभि
रिति पूर्वमेव चतुःसंख्योपादानात्त्रित्वं तावदपगतं प्रकरणबलात्· अथ गतेन च त्रित्वे देवकृतस्येत्यस्मि
न्मागात्मेवं वाक्यस्यार्थान्तरवाक्यानां षट्संख्याकल्प्या समिद्भिरिति बहुवचनं· षड्देवपर्यवस्यतीति वाक्य
बलात्षडाहुतयः समिधः भवंति· पिंडकरणात्पूर्वं द्विरनुमंत्रणं मंत्रा आप्यायस्वेत्येवमादयः। पिंड
करणानंतरं ॐमित्येवमादयः ॐ भूः। भुवः। स्वः। तपः। सत्यं। यशः। श्रीः। ईर्क्। उट्। ओजः। तेजः। पुरुषः
धर्मः शिवः॥ इत्येतैर्ग्रासानुमंत्रणं द्विरनुमंत्रणं। अत्र संते मनसा मनइति स्वाहेति वा प्रयुंजीत· तपः
प्रभृति मंत्राश्चतुर्थ्यंताः। नमस्स्वस्ति स्वाहेत्यादि सूत्रेण चतुर्थीविधानात्। तथा ग्रासप्रमाणमस्याश्चतुः

प्र· भैक्षसक्तुकणयावकपिण्याकपयोदधिघृतमूलफलोदकादीनि हवींष्युत्तरोत्तरं प्रशस्तानि॰ पौर्णमा
स्यां पंचदशग्रासान्भुक्त्वा एकापचयेनापरपक्षमश्नीयात् अमावास्यामुपोष्य एकोपचयेन पूर्वपक्षवि
३ परीतमेकेषामेकेषामेव चांद्रायणं मासइति। ग्रासप्रमाणमितिशिख्यंडपरिमितपंचदशादिग्रासभो
जनासमर्थबालादिविषयं। एवमेव कुक्कुटांडाद्र्यामलकपरिमाणग्रासत्रयपेक्षया भोज्यं। चतुर्दश्यामु
पवासः पौर्णमास्यां पंचदशग्रासभोजनं। ततः एकैकग्रासह्रासः। अमावास्यायामुपवासः। ततः पौ
र्णमासीपर्यंतं पंचदश।१५॥ ग्रासवृद्धिरिति द्वात्रिंशद्दिनसाध्यं।३२॥ चांद्रायणं। योगीश्वराद्युक्तचांद्रा
यणाद्यपेक्षया अस्य तु पिपीलिकामध्यं। विपरीतकरणे तु यवमध्यं भवति। ग्रासवृद्धौ ह्रासे च तिथि
वृद्धिक्षयवशः कदाचित्षोडशत्वं कदाचित्चतुर्दशत्वमपि भवति। ग्रासस्तु चंद्रोदये जाते ग्रसनीयः।

उदयश्च कदाचिन्नक्तं कदाचिद्दिवेति। तदनुसारेण कर्तव्यं ग्रासग्रसनं। तथा। चांद्रमसं चरुं श्रपयित्वा ज्यो
त्स्नायां चरुशेषान्नपिंडान् सावित्र्याभिमंत्रितान् प्राश्नीयादिति। ग्रासग्रसनसमये यातिथिः स्यात्तया ग्रा
ससंख्या पादेया। ज्योत्स्नानुरोधेन चंद्रोदयो लक्ष्यते॥ तथाचार्धरात्रादावपि भोजनदोषो नास्ति। स्वःत्रा।
आर्द्रामलकमात्रास्तु ग्रासा इंदुव्रते स्मृताः। तथैवाहूतयस्तत्र शोध्यार्थं चैव मार्त्तिकाः। एकैकं ग्रासयेत्पिंडं कृष्णे
शुक्ले च वर्धयेत्। उपस्पृशंस्त्रिषवणमेतच्चांद्रायणं स्मृतमिति। अन्यदपि याज्ञवल्क्यः। यथाकथंचित्पिंडानां च
त्वारिंशच्छतद्वयं। २४०। मासेनैवोपभुंजीत चांद्रायणमथापरं। अत्रायं क्रमः दिने दिने ष्टौ ग्रासान्भुंजीत। अ
थवा नक्तं चतुरो नक्तं चतुर इति। अथैकस्मिन्दिने चतुरोपरस्मिन्द्वादश। इतैकरात्रमुपोष्यापरस्मिन्षोडश
। यद्वा। दिनद्वयमुपोष्य तृतीयदिने द्वात्रिंशदित्यादिप्रकाराणामन्यतमापेक्षया भुंजीतेति। अत्रेति

व. थ्यपेक्ष यामासनियमोनास्ति। उपक्रमस्तु शुक्लकृष्णप्रतिपदोरन्यतरकर्तव्यः। यस्तुनैरंतर्येणैवंविधः चांद्राय
णानुष्ठानं करोति। तस्य तिथिवृद्धिक्षयाभ्यां मासावर्तनेन कदाचित् द्वितीयादिस्वारंभो भवति। तत्र न दोषः। चंद्रगत्यनु
४ सरणमंतरेण त्रिंशद्दिनात्मकसावनमासानुसारेणानुष्ठेयत्वात्। अत्र चांद्रायणशब्दो गौणः स्तद्धर्मप्रा
प्त्यर्थः। कुंडपायिनामयनं अग्निहोत्रशब्दवत्। अस्मिन्चांद्रायणे पूर्वप्रक्रांतमेव पंचदश्युपवासादिनत्
यते तिथिनियमेन ग्रासनियमाभावात्॥ यत्र तु तिथिनियमेन ग्रासेनियमः। तत्र पूर्वप्रक्रांतमुपवासादि
कं अन्येन कारयेत्। एवं चैव प्रकारेषु मुख्यचर्वन मनुनाविशेषसंज्ञा दर्शिता। अष्टावष्टौ समश्नीयात् पिंडान्मध्यंदिने
स्थिते। नियतात्मा हविष्यस्य यतिचांद्रायणं चरन्॥ चतुरः प्रातरश्नीयात् नियतात्मा द्विजव्रतः। हविष्यान्नस्यचै
मासमृषिचांद्रायणं स्मृतं॥ ॥अथ सामायनं॥ एतदपि चांद्रायणधर्मकमेव॥ तत्तु कृष्णचतुर्थीमारभ्य

क्रु द्वादशीपर्यंतं तमनुष्ठेयं। द्वारितः। चतुर्थ्यां प्रभृति चतुःस्तनेनाप्तिरात्रं। त्रिस्तनेनाप्तिरात्रं। द्विस्तनेनाप्तिरात्रमे
कस्तनेनाप्तिरात्रं। एकमेकस्तनप्रभृति पुनःचतुःस्तनांते। यातेसोमचतुर्थ्यां तनूस्तस्यानः पाह्यिस्यस्वाहा। या
ते पंचमीषष्ठीत्येवं यथार्थोस्तिथिहोमाएकमासं। एनोभ्यः पृतश्चंद्रमसासामान्यतांमामानेन्द्रोकृतांमाय
ष्यंचगच्छतीति चतुःस्त्रिद्व्यादिक्रमेण स्तनानांह्रासात्पुनरेकादिक्रमेणवृद्धेः शुक्लचतुर्थ्यांवारंभदिनमितिग
म्यते। स्तनेनाप्तिरात्रमित्यभिहितत्वात्। मुखएवदोहइतिप्रतीयते। तदनुपपन्नं। साक्षात्स्तनेन विसाध्य
नं। अपितुतत्स्थितंपयः। अग्येचहोमेभिहितः। होमश्चद्रव्यसाध्यः। तच्चद्रव्यंकूलदुग्धपात्स्यागेनकल्प्यं।
आद्यादिकंनयुज्यते। तस्माच्चतुःस्तनादिस्थितंदुग्धंगृहीत्वा यातेसोमेत्यादिभिर्मंत्रैः प्रतितिथि एकैकामा
हुतिंहुत्वा पयःपिबेत। चांद्रायणधर्मातिदेशाच्चंद्रोदयएवपयःपानं। मंत्रोरुक्तेयंकर्तव्यः। यातेसोम

व्र॰ पंचमीतनूः यानः पाहितस्यैस्वा॰॥इतिपंचम्यां॥एवंषष्ठ्यांषष्ठीपदप्रयोगः॥उत्तरत्राप्यमावास्यापर्यंतमे
वमेव।पुनःप्रतिपदिप्रथमातनूरित्येवंप्रयोगः।ततोद्वितीयादिषुद्वितीयातनूरित्यादि।एतच्चतुर्विंशतिदि
५ नसाध्यं।यथार्थास्तिथिहोमाइत्युक्तत्वात्।चतुर्थ्याद्वादशीमध्येयत्रतिथिक्षयोभवेत्।चतुर्विंशतिदिना
निभवंतितत्रैवकर्तव्यं।एवंसोमायनशब्दविशयं।अत्रविषयेतुमार्कंडेयः॥गोक्षीरंसप्तरात्रंतुपिबेत्स्तनः
चतुष्टयात्।स्तनत्रयात्सप्तरात्रंसप्तरात्रंस्तनद्वयात्।स्तनेनैकेनषड्रात्रंत्रिरात्रंवायुभुग्भवेत्।इति॥॥
अथयावकव्रतं।गोपुरीषाद्यवान्नंतुमासंनित्यंसमाहितः॥व्रतंयातुवकंकुर्यात्सर्वपापापनुत्तये।अ
थाघमर्षणव्रतं॥मनुः।त्र्यहंतूपवसेद्युक्तस्त्रिरह्नोभ्युपयन्नपः॥मुच्यतेपातकैःसर्वैःस्त्रिर्जपित्वाघम
र्षणं॥अथाश्वमेधःक्रतुराट्सर्वपापापनोदनः।तथाघमर्षणसूक्तंसर्वपापापनोदनं॥अत्रैवविशे

पमार्द्दीचक्रम्:। प्रत्यहंत्रिषवणस्नानमप्सुमग्नोऽघमर्षणं। जपेद्वयाखिलंस्त्रिं छंद्रात्राचासीतगांत्यजेत।क
र्मणांतेपयस्विनींदद्यादिति याज्ञवल्क्यः। अनादिष्टेषुपापेषुशुद्धिश्चांद्रायणेनतु। धर्मार्थंयश्चरेदेतत्चंद्र
स्यैतिसलोकतां। कृच्छ्रकृद्धनकामस्तुमहतींश्रियमाप्नुयात्। अथकृच्छ्रचांद्रायणसाधारणेतिकर्तव्यता:॥
याज्ञवल्क्यः। कुर्यात्त्रिषवणस्नायीकृच्छ्रचांद्रायणंतथा॥ पवित्राणिजपेत्पिंडान्गायत्र्याचाभिमंत्रयेत॥ जपेत्
अघमर्षणादिसूक्त: शुद्धवत्यस्तरत्समंदीत्यादिचसिद्धादिह्नार्णोतानिजप्यानि: सामसमप्रदर्शितानियथाश
र्वंजपेत। अविरुद्धकालेषुपिंडान्ग्रासान्गायत्र्याभिमंत्रयेत। ग्रासानुमंत्रणंगौतमोक्तंगोभूरित्यादिमं
त्रै: सहगायत्र्याविकल्प:। एवंजपादिषुएककार्याणांमंत्राणांविकल्प:। भिन्नकार्याणांसमुच्चयइतिज्ञातव्यं
॰मनु: महाव्याहृतिभिर्होम: कर्तव्य: स्वयमन्वहं। अहिंसासत्यमक्रोधमार्जवंचसमाचरेत। त्रिरह्नस्त्रिर्न